
ISSN: 2582-7219



# International Journal of Multidisciplinary Research in Science, Engineering and Technology

*(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)*



Impact Factor: 8.206

Volume 8, Issue 8, August 2025

www.ijmrset.com ijmrset@gmail.com +91 6381 907 438 +91 63819 07438

© 2025 IJMRSET | Volume 8, Issue 8, August 2025| DOI:10.15680/IJMRSET.2025.0808020

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

# क्रियात्मकानुसन्धानस्य क्रियान्वयनम्

**Dr. A. Charukesh**

Assistant Professor, Department of Education, National Sanskrit University, Tirupati, India

**प्रस्तावना:** अनुसन्धानेन संस्कृतभाषाशिक्षणे आगतानाम् उत आगम्यमानानां समस्यानां परिष्कारार्थं कथं संस्कृतभाषाशिक्षकः स्वीय शिक्षण कार्येण सह प्रायोगिकम् एवं परीक्षणाधारितानुसन्धानकार्यं कर्तुं प्रभवतीति ज्ञातुं शक्यते। किमर्थम् संस्कृतभाषाशिक्षणे अनुसन्धानकार्यम् ? इति चेत् – सम्प्रति शिक्षायां एतेन नवीनशैक्षिकसिद्धान्तानाम्, आधुनिकविधीनां, नवीनपरीक्षणानां च प्रतिपादनं जायमानं वर्त्तते। एतत् सर्वमपि अनुसन्धानेनैव साध्यमिति नास्ति संशयः । एतादृशमौलिकानुसन्धानैः अद्य शिक्षायाः सैद्धान्तिकपक्षः अत्यन्तं शक्तिशाली सुदृढश्च जायमानः वर्त्तते।

परन्तु अद्य सैद्धान्तिकपक्षस्य दृढत्वकारणतः शिक्षासम्बद्धसमस्यानां समाधानं पूर्णतया तु भवितुं नार्हति। यदि संस्कृतशिक्षां प्रभावशालिनीं सर्वतोन्मुखीञ्च कर्तुम् इच्छामः, तर्हि तत्र क्रियात्मकस्य व्यावहारिकस्य च पक्षस्य यथोचितं महत्त्वं कल्पनीयम्। इदानीं शिक्षायाः सैद्धान्तिकपक्षः एव केवलं प्रभावशाली भवेदिति नास्ति, अपि तु विद्यालयीयकार्यप्रणालीनां कथं संशोधनं परिवर्तनं च सम्पादनीयं, कथं सा कार्यप्रणाली सामर्थ्ययुक्ता महत्त्वपूर्णा च भवेत्, तस्याः विविधपक्षाः कथं छात्रानुकूलाः विधेयाः, तस्याः सङ्घटने कथं सौष्ठवं सम्पादनीयं, नित्यव्यावहारिकसमस्यानां समाधानर्थं कथं सा समर्था स्यात् – इत्यादीनां पूर्वोक्तानाम् उद्देश्यानां प्राप्तये एकमेव साधनं शिक्षाक्षेत्रे दृश्यते – **क्रियात्मकानुसन्धानम्** इति। अनेकशिक्षणसमस्यानां समाधानार्थं क्रियात्मकानुसन्धानस्य शिक्षाप्रक्रियायां महत्त्वपूर्णं योगदानं विद्यते। शिक्षणे आगम्यमानानां समस्यानां वैज्ञानिकपद्धत्या अत्र गभीराध्ययनं विधाय तत्समाधानं परिवर्तनोपायाः च सूच्यन्ते।

## I. क्रियात्मकानुसन्धानस्यार्थ

विद्यालयीयकार्यप्रणाल्याः परिष्कारार्थं परिवर्तनार्थं च एषः कश्चन महत्त्वपूर्णः विधिः। एतस्य अनुसारं शिक्षकः स्वशिक्षणसमस्याः समाधातुम् अस्य प्रयोगं कुरुते। प्रधानाचार्यः विद्यालयीयसमस्याः समाधातुं वैज्ञानिकाध्ययनेन तत्र परिवर्तनं सम्पादयति। इयञ्च क्रियानुसन्धानप्रक्रिया, समस्या केन्द्रिता भवति। शोधकार्यप्रणाल्यां विद्यमानसमस्याः समाधाय, तत्र परिवर्तनानयनम् एतस्याः केवलम् उद्देश्यं न, अपि तु क्रियानुसन्धानस्य माध्यमेन शिक्षायाः तादृशदैनिकसमस्यानां समाधानम् अध्यापकः स्वसहयोगिनां साहाय्येन प्रभाविरूपेण प्रस्तौति। एतेन शिक्षाम् अधिकोपयोगिनीं विधाय शैक्षिकसमस्यानां समाधानं वैज्ञानिकरूपेण वस्तुनिष्ठरूपेण प्रामाणिकरूपेण च प्रस्तूयते।

**क्रियात्मकानुसन्धानस्य परिभाषाः-**

1. स्वकार्याणां परिष्कारार्थं कार्यकर्तृभिः शिक्षायां कृतानुसन्धानमेव क्रियानुसन्धानम् इत्युच्यते - **कोरे Corey)**
2.शिक्षकस्य समक्षम् उद्भूतासु समस्यासु अनेकाः समस्याः तत्कालमेव समाधेयाः भवन्ति।तात्कालिकसमस्यानां समाधानार्थं कृतानुसन्धानं सामान्यतः शिक्षायां क्रियानुसन्धानमिति अभिज्ञायते इति। **मौली (Mouly)**
3.शिक्षकैः निरीक्षकैः प्रशासकैः कृतकार्याणां कृत निर्णयस्य च गुणात्मकसमुन्नयनार्थं क्रियमाणम् अनुसन्धानम् एव क्रियानुसन्धानम् इति।**गुड् (Good)**
4.क्रियानुसन्धानं सङ्घटितशोधस्य काचित् क्रिया, यस्याः उद्देश्यः कस्यचित् एकस्य व्यक्तिविशेषस्य समूहस्य वा क्रियासु परिवर्त्तनम् आनेतुं विकासं च कर्तुं किञ्चन अध्ययनं, यत् रचनात्मकं प्रस्तावं प्रस्तौति इति। **मैक् ग्रेथ तथा अन्ये (Me Grath & Other)**

## II. संस्कृत शिक्षणे क्रियात्माकानुसन्धानस्यावश्यकता

क्रियात्मकानुसन्धानं भाषागत उपलब्धीनाम् उन्नयने तथा संस्कृतभाषाधिगमे आगम्यमानानां विभिन्न बाधानां निराकरणे एवम् उपचारे च सहायभूतं भवति। भाषाशिक्षणप्रक्रियायाः अङ्गभूतत्वेन विद्यमान समस्यानां समाधानार्थं शिक्षण प्रक्रियया सह प्रवृत्तिभूतम् अनुसन्धानकार्यम् इति कारणात् अनुसन्धानमिदं क्रियात्मकानुसन्धानम् इत्यभिधीयते।

ISSN: 2582-7219 |www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)
(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

संस्कृतशिक्षणेनसम्बद्ध अनेक समस्यानां प्रक्रियात्मकरूपेण समाधातुं क्रियात्मकानुसन्धानस्यावश्यकता नितरां वर्त्तते एव, यस्योपयोगेन कक्ष्याकार्यशैल्याम् एवं व्यवस्थायाम् अनेके उत्कर्षाः समुद्भवन्त्येव तथा च अनेन सह संस्कृत शिक्षकस्य शैक्षिक स्थितावपि प्रवृद्धिर्जायते यथा -

- संस्कृतमयकक्ष्यावातावरणस्य निर्माणे अनुसन्धानमिदं सहायभूतं भवति।
- स्तरानुसारं संस्कृतशिक्षणस्य सम्पादने सहायभूतं भवति।
- प्रभावीपूर्णकक्ष्याशिक्षणसमापादनम्।
- वैज्ञानिकदृष्टिकोणस्य विकासः सम्पादनम्।
- भाषाकौशलस्य विकाससम्पादनम्।
- कक्ष्याप्रबन्धनम्।

## III. क्रियात्मकानुसन्धानमौलिकानुसन्धानयोः भेद

शिक्षाक्षेत्रे क्रियात्मकानुसन्धानेन सह मौलिकानुसन्धानस्यापि विशेषमहत्त्वं वर्त्तते। एकस्मिन् पक्षे तु शिक्षाक्षेत्रे सिद्धान्तानां प्रतिपादनम् अपेक्षितं, तत्रैव अपरस्मिन् पक्षे व्यावहारिककाठिन्यं दूरीकर्तुं सम्बद्धव्यक्तीनां वैज्ञानिकप्रयासाः अपि तावदेव अपेक्षिताः भवन्ति। उपर्युक्तयोः द्वयोरपि अनुसन्धानयोः मौलिकभेदान् अवगत्य बेस्ट(Best) महोदयेन स्वपुस्तके लिखितं यत् - मौलिकानुसन्धानं वैज्ञानिकविधिना विश्लेषणस्य सामान्यीकरणस्य च औपचारिकी व्यवस्थिता च प्रक्रिया भवतीति। क्रियात्मकानुसन्धानेन मौलिकानुसन्धानस्य वास्तविकाभिप्रायान् स्वीकृत्य सिद्धान्तप्रतिपादनस्य स्थाने समस्यायाः समाधाने एव स्वीयम् अवधानं केन्द्रीकरोति। मौलिकानुसन्धानस्य क्रियात्मकानुसन्धानस्य च मध्ये विद्यमानभेदम् अत्र प्रस्तूयते ।

| सोपानानि | क्रियात्मकानुसन्धानम् | मौलिकानुसन्धानम् |
|---|---|---|
| **1 .उद्देशः** | 1.विद्यालयस्य कक्षायाश्च कार्यप्रणाल्यां समीकरणम् | 1.नूतनतथ्यानामनुसन्धानं, नवीनसिद्धान्तानां च प्रतिपादनम्। |
| **2. समस्या** | 2.समस्यायाः स्वरूपं विद्यालयपर्यन्तं परिमितं भवति अर्थात् समस्यायाः बाह्यमूल्याङ्कनं न भवति। | 2.समस्यायाः रूपम् अधिकं व्यापकं मौलिकं च भवति। एतस्य स्वरूपस्य सैद्धान्तिकं भवति। |
| **3. परिकल्पना** | 3.परिकल्पनानां प्रतिपादनं कारणानां विश्लेषणे आधारितं भवति। एकस्मिन् काले एकस्याः परिकल्पनायाः एव सत्यापनं भवति। | 3.परिकल्पनानां प्रतिपादनं पूर्वसंशोधननिष्कर्षेषु, सिद्धान्तेषु, अनुभवेषु च आधारितं भवति। एकस्मिन् काले सर्वासां परिकल्पनानां सत्यापनं भवति। |
| **4. अनुसन्धाता** | 4.शिक्षकस्य, प्राचार्यस्य, प्रशासकस्य, विद्यालयस्य निरीक्षकस्य च प्रत्यक्षसम्बन्धः भवति। | 4.शोधकर्ता निर्दिष्टविषये स्नातकोत्तरोपाधिं सम्पादयेत्। समस्यया सह प्रत्यक्षसम्बन्धः भवेत् इति नास्ति नियमः। |
| **5. न्यादर्शः** | 5.न्यादर्शचयनस्य समस्या न भवति। शिक्षकः यत्र पाठयति, तत्रैव तस्य न्यादर्शः भवति। | 5.न्यादर्शस्य समस्या कठिना भवति। न्यादर्शप्रविधेः ज्ञानम् अपेक्षितं भवति। |
| **6. उपयोगः** | 6.विद्यालयस्य कक्षाशिक्षणस्य च समीकरणं क्रियते। अभ्यासकर्ता स्वकार्यकौशलं प्रभावपूर्णं करोति। | 6.शिक्षासम्बद्धसमस्याः अधीत्य व्यवहारविज्ञानस्य विकासः क्रियते। |
| **7. व्यवस्था** | 7.शिक्षकः स्वयमेव साधनानि एकत्रीकरोति। | 7.अनुसन्धाता स्वयं साधनानि एकत्रीकरोति। |
| **8. मूल्याङ्कनम्** | 8.समस्यायाः समाधाने कियत् साफल्यं प्राप्तं न वेति शिक्षकः स्वयं निश्चिनोति। | 8.नियुक्ताः विशेषज्ञाः बाह्यमूल्याङ्कनं कृत्वा उत्तमकार्यस्य कृते उपाधिं प्रयच्छन्ति। |
| **9.प्रदत्तानां-विश्लेषनम्** | 9.सरलसांख्यिक्याः प्रयोगः क्रियते। निरीक्षणस्य आधारेण निर्णयः स्वीक्रियते। | 9.उच्चस्तरसांख्यिक्याः प्रयोगः क्रियते। सांख्यिकी – परिकल्पनायाः विशेषमहत्त्वं भवति। |
| **10. प्रारूपम्** | 10.अस्य प्रारूपं मृदु भवति। अतः शोधकर्तृणां कृते विशेषप्रशिक्षणस्य आवश्यकता न भवति। | 10.मौलिकानुसन्धानस्य प्रारूपं मृदु न भवति। अतः अत्र शौधकर्तृणां कृते विशेषप्रशिक्षणस्य आवश्यकता भवति। |

### IV. क्रियात्मकानुसन्धानस्य प्रक्रिया/ सोपनानि

क्रियात्मकानुसन्धानप्रणाल्यां वैज्ञानिकप्रणाल्याः अपि वैशिष्ट्यं परिलक्ष्यते। अत्र वैज्ञानिकरूपेण वस्तुनिष्ठरूपेण च समस्याः अधीत्य ताः समस्याः समाधातुं प्रयासः क्रियते। प्रत्यक्षरूपेण अस्याः प्रणाल्याः मुख्यसोपनानि इत्थं वर्त्तन्ते –

**1.समस्यायाः ज्ञानम् –**

विद्यालये सम्भाव्यमानानां समस्यानाम् अवगमनम् एव क्रियात्मकानुसन्धानस्य प्रथमं महत्त्वपूर्णं च सोपानं भवति। अनुसन्धातुः समक्षं समस्या यावत्स्पष्टा भवति तावत् अनुसन्धानम् अधिकं सफलम् उद्देश्यपूर्णं च भविष्यति। समस्यायाः ज्ञानार्थम् अनुसन्धाता व्यापकः, उदारः, संवेदनशीलः च भवेत्। समस्यायाः ज्ञानार्थं दैनिककार्यक्रमेषु प्रत्येकं क्षेत्रम् अङ्गं च जागरूकतया वस्तुनिष्ठरूपेण च सः अवलोकयेत्। एतत् तदा एव सम्भवति यदा विद्यालयस्य प्रबन्धकाः, शिक्षकाः च एतस्मिन् विषये स्वविचारान् प्रकटयिष्यन्ति। एवं रीत्या ते वास्तविकसमस्याम् अवगत्य तस्मिन् कार्ये अग्रे गन्तुम् अर्हन्ति।

**2. समस्यायाः परिभाषीकरणं सीमाङ्कनञ्च –**

समस्यायाः पूर्वज्ञानान्तरं क्रियात्मकानुसन्धानप्रणाल्याः समस्यायाः परिभाषीकरणं सीमाङ्कनञ्च द्वितीयं महत्त्वपूर्णसोपानं भवति। परिभाषीकरणप्रक्रियायां समस्यायाः प्रत्येकं पक्षं स्पष्टतया निश्चीयते। समस्यायाः कार्यक्षेत्रं निश्चितपरिमितौ अङ्कनम् एव सीमाङ्कनस्य तात्पर्यं, यतो हि तथ्यपूर्णाध्ययनार्थं समस्यायाः सीमाङ्कनं, तत्केन्द्रबिन्दुनिर्धारणम् अत्यन्तम् अनिवार्यम्।

**3. समस्यायाः मूलकारणानां विश्लेषणम् –**

समस्यायाः निश्चितरूपं प्रदानात् परं समस्यायाः समाधानार्थं समस्यया सम्बद्धानां प्रभावीकारणानाम् अन्वेषणं क्रियते। एतदर्थम् अनुसन्धाता बहुविधसाक्षिणः एकत्रीकरोति। समस्यायाः कारणं तर्कसङ्गतं, वास्तविकं, विशिष्टञ्च स्यात्, येन परीक्षणं सम्भवेत्।

**4. क्रियात्मकपरिकल्पनायाः निर्माणम् –**

समस्यायाः विभिन्नसम्भाव्यकारणानि विश्लिष्य तदाधारेण क्रियात्मकपरिकल्पनायाः निर्माणं क्रियते। क्रियात्मकानुसन्धानस्य साफल्याधारेण एव क्रियात्मकपरिकल्पना भवति। परिकल्पना यावत्स्पष्टा, तथ्याधारिता, वास्तविकी भवति, अनुसन्धाने तावत् साफल्यं सम्भाव्यते।

**5. कार्यरूपरेखायाः निर्माणम् –**

समस्यायाः परिकल्पनानिर्माणानन्तरं तस्याः परिकल्पनायाः परीक्षणं क्रियते । एतत्परीक्षार्थं कार्यप्रारूपं निर्मीयते। अत्र अनुसन्धानविधीनां प्रविधीनां च विषये निर्णयः, प्रदत्तानां सङ्कलनार्थं परीक्षणस्य चयनं, तद्विश्लेषणस्य उपायः च निश्चीयन्ते। विभिन्नक्रियाणां सम्पादनं कदा, केषां साहाय्येन च कर्तव्यमस्तीति क्रियात्मकानुसन्धानस्य रूपरेखानिर्माणसमये निश्चीयते।रूपरेखायां क्रियाणां विवरणम् एकस्मिन् निश्चितानुक्रमे भवेत्, येन क्रमानुसारम् एतत्पूरयितुं शक्येत।

**6. निष्कर्षाणां प्रतिपादनम् –**

कार्यरूपरेखायाः क्रियान्वयनानन्तरं सङ्गृहीतानां तथ्यानां प्रमाणानां वा निष्कर्षः सम्पाद्यते (निष्कास्यते)। एतेषां निष्कर्षाणाम् आधारेण नियमाः निर्मीयन्ते। एते एव नियमाः कार्यप्रणाल्याः समीकरणार्थं कश्चन प्रयासः। एतेन भाविक्रियात्मकानुसन्धानाय प्रेरणा लभ्यते।

**संस्कृतशिक्षण क्षेत्रे क्रियात्मकानुसन्धानाय कतिपय समस्याःक्षेत्रञ्च–**

- ❖ संस्कृतच्छात्रव्यवहारगत समस्याः।
- ❖ संस्कृतशिक्षकव्यवहारगत समस्याः।
- ❖ संस्कृतशिक्षणव्यवहारगत समस्याः।
- ❖ संस्कृतपरीक्षा एवं परीक्षणगत समस्याः।
- ❖ संस्कृतपाठ्यसहगामीक्रियागत समस्याः।
- ❖ विद्यलयीय (प्रबन्धनम् एवं प्रशासनम्) समस्याः
- ❖ संस्कृतभाषाशिक्षणे कौशलानां (श्रवण,भाषण,पठन,लेखन) प्रोन्नतये उपयुक्त क्रियात्मकप्रकल्पानाम् आयोजनं परीक्षणञ्च।
- ❖ वर्त्तनीशिक्षणे श्रुतलेखनं तथा अनुलेखनम् इत्यनयोः तुलनात्मकमध्ययनम्।
- ❖ संस्कृतशिक्षणविधीनां प्रभावकारितायाः अध्ययनम्।
- ❖ संस्कृतशिक्षणाय उपयुक्त वातावरण निर्माणस्य समस्या।
- ❖ संस्कृतभाषायां प्रभावोत्पादकाभिव्यक्तेः समस्याः।

- ❖ संस्कृताध्ययने मन्दाधिगमच्छात्रेभ्यः उचित निर्देशनस्याभावगत समस्याः।
- ❖ संस्कृतशिक्षणे व्याकरण नियमानाम् एवं भाषाविज्ञान नियमानां अननुपालनस्य समस्या।

## V. उपसंहार

अनेन शोधपत्रेण स्वीय संस्कृतशिक्षणाधिगमप्रक्रियायां समुद्भूत समस्यानां समाधानार्थम् अनुसन्धानपरियोजनानां निर्माणम् एवं क्रियान्वयनं कर्तुं शक्यते, एवञ्च शिक्षार्थीनां भाषाधिगम क्रियायां सरलतां सुगमताञ्च सम्पादयितुं शक्यते।

एवं क्रियात्मकानुसन्धानं व्यावहारिकं तथा उपयोगीभूतस्तु भवत्येव, असकृत् अन्य भाषाशिक्षकेभ्यः प्रेरणादायी अपि भवति, क्रियात्मकानुसन्धानं सीमितपरिधौ क्रियमानानुसन्धानं वर्त्तते येन अभ्यासकर्त्ता स्वीय वास्तविक शैक्षिक परिस्थितौ विद्यमान मूर्त्त समस्यानां समाधानं वैज्ञानिक विधिना करोति।

**।।इति शम्।।**

सन्दर्भग्रन्थ सूची : -

1.**संस्कृतशिक्षणम्-नवीनप्रविधयश्च ( Teaching Sanskrit With New Techniques)**
लेखकौ – प्रो.च.ल.ना.शर्मा, डा.फतेहसिंहः
प्रकाशकः – आदित्यप्रकाशनम्, जयपुरम् - 1996 & 2008
2. **शैक्षिक अनुसन्धान की विधियाँ (Methods of Educational Research)**
लेखकौ – डा. गया सिंह, डा.अनिल कुमार राय
3. **शिक्षा अनुसन्धान (Education Research)**
लेखक – आर.ए. शर्मा
प्रकाशक – अनु बुक्स - 2019



INNO SPACE
SJIF Scientific Journal Impact Factor

INTERNATIONAL STANDARD SERIAL NUMBER INDIA

निस्केयर NISCAIR

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY RESEARCH

IN SCIENCE, ENGINEERING AND TECHNOLOGY

| Mobile No: +91-6381907438 | Whatsapp: +91-6381907438 | ijmrset@gmail.com |

www.ijmrset.com